# ६. षष्ठोऽध्यायः

(१) ज्योतिषग्रन्थेषु षड्वर्गसाधनम् तद्भेदाश्च।

(२) ज्योतिषस्यभेदत्रये होराशास्त्रस्य वैशिष्टयम्।

(३) द्वादशलग्नानां फलकथनम् (विविधाचार्यमतेषु)

# ज्योतिषग्रन्थेषु षड्वर्गसाधनम् तद्भेदादि

| लग्न | सूर्य | चन्द्र | मंगल | बुध | गुरु | शुक्र | शनि | राहु | केतु |
|---|---|---|---|---|---|---|---|---|---|
| ०४ | ११ | ०२ | ०० | ११ | ९ | ११ | ०७ | ०० | ०६ |
| २४ | १५ | १२ | १६ | २३ | १६ | २३ | ०४ | २६ | २६ |
| ४९ | ०३ | ३१ | ३८ | ४२ | ५१ | ४७ | ०४ | ५२ | ५२ |
| २५ | २० | २६ | १५ | ४३ | २९ | १७ | ४९ | २० | २० |

## सम्पदा विचार
## होराचक्र निर्माण विधि

एकस्मिन् राश्यां पञ्चदशात्मकं द्वयोः हारा भवति। यथा - विशम राशौ (मेष, मिथुन, सिंह, तुला, धनु, कुम्भ)। प्रथम सूर्यस्य तथा द्वितीयः चन्द्रस्य होरा भवति। समराशिषु (वृषभ, कर्क, कन्या, वृश्चिक, मकर, मीन) प्रथम चन्द्रस्य द्वितीय सूर्यस्य होरा वर्तते।

सिंह जन्म लग्ने विषम राशिः भवति तथा च अंशात्मकं पञ्चदाशत् अधिकं अस्ति अतः होराचक्रे लग्नभावे चन्द्रस्य होरा जायते।

सूर्यः मीन राश्यां अर्थात् समराशिमध्ये स्थितः एवं द्वितीय भागे अंशानां संख्या भवति अतः सिंह राश्यां सूर्यः ज्ञेयम्।

तथा च चन्द्रः विषराश्यां (मिथुन १५) पञ्चदश अंशात् न्यूनः वर्तते अतः सूर्यस्य होरायां चन्द्रो..पि वर्तते।

अनेन प्रकारेण शेष कौमादि ग्रहाणामपि गणना करणीयम्।

अथहोराचक्रम् -




## होरा चक्रम्

| राशि | १ से १५ अंश तक | १६ से ३० अंश तक |
|---|---|---|
| मेष | सूर्य | चन्द्र |
| वृष | चन्द्र | सूर्य |
| मिथुन | सूर्य | चन्द्र |
| कर्क | चन्द्र | सूर्य |
| सिंह | सूर्य | चन्द्र |
| कन्या | चन्द्र | सूर्य |
| तुला | सूर्य | चन्द्र |
| वृश्चिक | चन्द्र | सूर्य |
| धनु | सूर्य | चन्द्र |
| मकर | चन्द्र | सूर्य |
| कुम्भ | सूर्य | चन्द्र |
| मीन | चन्द्र | सूर्य |

# द्रष्कोणः (भ्रातृसौख्यम्)

एकस्मिन् राश्यां भागत्रयम् क्रिपते तदादश अंशानां द्रेष्काणमेकं प्राप्यते। अतः स्फुररूपेण कथितंयत्-

राशिमध्ये त्रिजीद्रेष्काण क्रमिण इत्थम्रूपेण प्राप्यते-

| | | |
|---|---|---|
| ० अंशात् | १० अंशपर्यन्तम् | प्रथम द्रेष्काण |
| ११ अंशात् | २० अंशपर्यन्तम् | द्वितीय द्रेष्काण |
| २१ अंशात् | ३० अंशपर्यन्तम् | तृतीय द्रेष्काण |

यस्यराशेः द्रेष्काणं ज्ञातुमिक्षति तदा प्रथमद्रेष्टकाण तस्मिन्नेव राश्यां भवति, द्वितीय द्रेष्काण राश्यात् पञ्चम राश्यां जायते। तथा च तृतीय द्रेष्काण राश्यात् नवम राश्यां ज्ञेयम्।

यथालग्नः

०४ । २४ । ४९ । २५ लग्नः २४ अंशात्मकः, अतः तृतीय द्रेष्काण मध्ये वर्तते। अतः सिंह राश्यात् नवमराशिः (मेषः) द्रेष्काण चक्रे मेष लग्न तिष्ठति।

अतः सूर्यः (११ । १५ । ३ । २०) द्वितीय द्रेष्काणे मीनराश्यात् पञ्चम (कर्क) राश्यां भवति।

शनेः (०७ । ०४ । ०४ । ९९) चतुर्अंशात्मकं वर्तते। अतः तस्मिन्नेव राश्यां द्रेष्काण कुण्डल्यां वर्तते।



# द्रेष्काण

| राशि प्रथम (१० अंश) | द्वितीय (२० अंश) | तृतीय (३० अंश) |
|---|---|---|
| मेष | सिंह | धनु |
| वृष | कन्या | मकर |
| मिथुन | तुला | कुम्भ |
| कर्क | वृश्चिक | मीन |
| सिंह | धनु | मेष |
| कन्या | कर | वृष |
| तुला | कुम्भ | मिथुन |
| वृश्चिक | मीन | कर्क |
| धनु | मेष | सिंह |
| मकर | वृष | कन्या |
| कुम्भ | मिथुन | तुला |
| मीन | कर्क | वृश्चिक |

# सप्तमांशः

## पुत्रपौत्रादिज्ञानम्

त्रिंशत् अंशानां सवृसंख्याभिः भाजनीयम् तदा ४ । १८ । ०८ अंश्यादिरूपेण फलं प्राप्तं अतः ४ । १७ । ०८ प्रथम भागः, इत्थंरूपेण सप्त खणः ज्ञात्वा तेषां विषमराशीं प्रथमादि भागः स्वराय्यात प्रारभ्यते। एवं समराशिषु प्रतमादि भागं स्वराभाय्त् सप्तमराशितः गणना भवति।

| सप्तमांश चक्रम् | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| अंशः | | | | | | | | | | | | |
| ४-१७ | १ मं. | २ मं. | ३ बु. | १० श. | ५ र. | १२ वृ. | ७ शु. | २ शु. | ९ वृ. | ४ चं. | १२ श. | ६ बु. |
| ८-३४ | २ शु. | ९ वृ. | ४ चं. | ११ श. | ६ बु. | १ मं. | ८ मं. | ३ बु. | १० स. | ५ र. | १२ बु. | ७ शु. |
| १२-५१ | ३ बु. | १० श. | ५ र. | १२ वृ. | ७ शु. | २ शु. | ९ वृ. | ४ चं. | ११ श. | ६ बु. | १ मं. | ८ मं. |
| १७-९ | ४ चं. | ११ श. | ६ बु. | १ मं. | ८ मं. | ३ बु. | १० श. | ५ र. | १२ वृ. | ७ शु. | २ शु. | ९ वृ. |
| २१-२६ | ५ र. | १२ वृ. | ७ शु. | २ शु. | ९ वृ. | ४ चं. | ११ श. | ६ बु. | १ मं. | ८ मं. | ३ बु. | १० श. |
| २५-४३ | ६ बु. | १ मं. | ८ मं. | ३ बु. | १० श. | ५ र. | १२ वृ. | ७ शु. | २ शु. | ९ वृ. | ४ चं. | ११ श. |
| ३०-१० | ७ शु. | २ शु. | ९ वृ. | ४ चं. | ११ श. | ६ बु. | १ मं. | ८ मं. | ३ बु. | १० श. | ५ र. | १२ वृ. |

यथा जन्मलग्नः ४ । २४ । ४९ । २५ अयं विषमराशिः (सिंहः) अस्य सप्तमांशस्

षष्ठे बागे अस्ति। सिंहात् षष्ठम्राशिः मकरः वर्तते । अतः सप्तमांशकुण्डल्यां मकर लग्नः इति।

जन्मकालिक स्पष्ट बुधः - ११ । २३ । ४२ । ४३ समराश्यां मीन, बुधः सप्तमांशस्य षष्ठभागे अस्ति। तदा मीनराशितः सप्तराशि कन्याराश्यात् गणना प्रारम्भ भवति। कन्याराश्यात् षष्ठम कुम्भमध्ये बुधः तिष्ठति।




## नवमांश
## कलत्र सौख्यम्

राशेः नवमभागः नवमांशः कथ्यते। एक नवमांशः ३० अंश २० कला भवति।

| | | |
|---|---|---|
| मेष, सिंह, धनु राशिनां | प्रथम नवमांशः | मेषस्य |
| वृष, कन्या, मकर, राशिनां | प्रथम नवमांशः | मकरस्य |
| मिथुन, तुला, कुम्भ राशिनां | प्रथम नवमांशः | तुलादेव गणना |
| वृश्चिक, मीन, कर्क राशिनां | प्रथम नवमांशः | कर्कात् प्रारभ्यते। |

# नवमांश चक्रम्

| नवांश | | नवांश | राशि | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| अंश | कला | १ | १ | २ | ३ | ४ | ५ | ६ | ७ | ८ | ९ | १० | ११ | १२ |
| ३ | २० | १ | १ | १० | ७ | ४ | १ | १० | ७ | ४ | १ | १० | ७ | ४ |
| ६ | ४० | २ | २ | ११ | ८ | ५ | २ | ११ | ८ | ५ | २ | ११ | ८ | ५ |
| १० | ०० | ३ | ३ | १२ | ९ | ६ | ३ | १२ | ९ | ६ | ३ | १२ | ९ | ६ |
| १३ | २० | ४ | ४ | १ | १० | ७ | ४ | १ | १० | ७ | ४ | १ | १० | ७ |
| १६ | ४० | ५ | ५ | २ | ११ | ८ | ५ | २ | ११ | ८ | ५ | २ | ११ | ८ |
| २० | ०० | ६ | ६ | ३ | १२ | ९ | ६ | ३ | १२ | ९ | ६ | ३ | १२ | ९ |
| २३ | २० | ७ | ७ | ४ | १ | १० | ७ | ४ | १ | १० | ७ | ४ | १ | १० |
| २६ | ४० | ८ | ८ | ५ | २ | ११ | ८ | ५ | २ | ११ | ८ | ५ | २ | ११ |
| ३० | ०० | ९ | ९ | ६ | ३ | १२ | ९ | ६ | ३ | १२ | ९ | ६ | ३ | १२ |

**स्पष्ट लग्नः - (०४ । २४ । ४९ । २५)**

स्पष्ट लग्नः सिंहराशेः २४ । ४९ । अस्ति अतः नवमांशस्य अष्टम् भागे जातः। सिंहराशि मध्ये स्थितः अतएव मेषात् गणना करणीयम्। मेषात् अष्टम् राशिः वृश्चिकः एतदथम् नवमांश कुणडल्याम् वृश्चिक लग्न लिख्यते।

**भौम स्पष्टः (०० । १६ । ३८ । १५)**

भौमः मेषराशिमध्ये पञ्चम नवमांशे अस्ति अतः मेषात् पञ्चमराशिमध्ये अर्थात् सिंह राश्यां भौमः तिष्ठति।

## द्वादशांश चक्रम्

| द्वादशांश | द्वादशांश | | स्वामी | राशि | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| क्रम | अंश | कला | | १ | २ | ३ | ४ | ५ | ६ | ७ | ८ | ९ | १० | ११ | १२ |
| १ | २ | ३० | गणेष | १ | २ | ३ | ४ | ५ | ६ | ७ | ८ | ९ | १० | ११ | १२ |
| २ | ५ | ०० | अ.कु. | २ | ३ | ४ | ५ | ६ | ७ | ८ | ९ | १० | ११ | १२ | १ |
| ३ | ७ | ३० | यम | ३ | ४ | ५ | ६ | ७ | ८ | ९ | १० | ११ | १२ | १ | २ |
| ४ | १० | ०० | सर्प | ४ | ५ | ६ | ७ | ८ | ९ | १० | ११ | १२ | १ | २ | ३ |
| ५ | १२ | ३० | गणेश | ५ | ६ | ७ | ८ | ९ | १० | ११ | १२ | १ | २ | ३ | ४ |
| ६ | १५ | ०० | अ.कु. | ६ | ७ | ८ | ९ | १० | ११ | १२ | १ | २ | ३ | ४ | ५ |
| ७ | १७ | ३० | यम | ७ | ८ | ९ | १० | ११ | १२ | १ | २ | ३ | ४ | ५ | ६ |
| ८ | २० | ०० | सर्प | ८ | ९ | १० | ११ | १२ | १ | २ | ३ | ४ | ५ | ६ | ७ |
| ९ | २२ | ३० | गणेश | ९ | १० | ११ | १२ | १ | २ | ३ | ४ | ५ | ६ | ७ | ८ |
| १० | २५ | ०० | अ.कु. | १० | ११ | १२ | १ | २ | ३ | ४ | ५ | ६ | ७ | ८ | ९ |
| ११ | २७ | ३० | यम | ११ | १२ | १ | २ | ३ | ४ | ५ | ६ | ७ | ८ | ९ | १० |
| १२ | ३० | ०० | सर्प | १२ | १ | २ | ३ | ४ | ५ | ६ | ७ | ८ | ९ | १० | ११ |

# त्रिशांश चक्रम्

| त्रिशांश | विषम साशि | | | | | | सम राशि | | | | | | त्रिशांश |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| अंश | १ | ३ | ५ | ७ | ९ | ११ | २ | ४ | ६ | ८ | १० | १२ | अंश |
| ० - ५ | १ | १ | १ | १ | १ | १ | २ | २ | २ | २ | २ | २ | ० - ५ |
| | मं | मं | मं | मं | मं | मं | शु | शु | शु | शु | शु | शु | |
| ५ - १८ | ११ | ११ | ११ | ११ | ११ | ११ | ६ | ६ | ६ | ६ | ६ | ६ | ५ - १२ |
| | श | श | श | श | श | श | बु | बु | बु | बु | बु | बु | |
| १० - १८ | ९ | ९ | ९ | ९ | ९ | ९ | १२ | १२ | १२ | १२ | १२ | १२ | १२ - २० |
| | गु | गु | गु | गु | गु | गु | गु | गु | गु | गु | गु | गु | |
| १८ - २५ | ३ | ३ | ३ | ३ | ३ | ३ | १० | १० | १० | १० | १० | १० | २० - २५ |
| | बु | बु | बु | बु | बु | बु | श | श | श | श | श | श | |
| २५ - ३० | ७ | ७ | ७ | ७ | ७ | ७ | ८ | ८ | ८ | ८ | ८ | ८ | २५ - ३० |
| | शु | शु | शु | शु | शु | शु | मं | मं | मं | मं | मं | मं | |

## २ होराशास्त्रस्य वैशिष्ठयम्

ज्योतिष शास्त्रस्य त्रयोभेदाः भवन्ति। तद्यथा सिद्धान्तः संहिता होराचेति रूपेण। तत्रापि प्रथमभेदस्य स्वरूपद्वयं प्राप्यते। सिद्धान्तः तत्रं च। अत्र इत्यापि अवधेयं कल्पादितः यत्र गणना क्रियते तत् तन्त्रमिति कथ्यते। उभयोः द्वौ पादौ प्राप्येते,प्रतेकं गणितं गोलः च इति। अग्रेगणितस्याऽपि भेदत्रयम् स्वीकृतम्। सामान्य -वीज- ग्रहगणित रूपेण। यस्मिन् स्कन्धे गणित-फलित द्वयोः सामान्य निर्देशः सकलविषयत्वेन सैवसंग्रहस्वरूपा संहिता कथ्यते। इयं संहिता चतुष्पदा स्वीकृता। ग्रहचार-कालफलः शकुनः स्वर भेदात्। यत्रस्थले वैयक्तिक सम्बन्धेन फलादेशः भवति सा होरा रूपेण स्वीक्रियते। होरायां पञ्चपदा भवति। यथा जातक-ताजिक-रमल-प्रश्न-स्वप्ननभेदादिति।

**होराशब्दस्य व्युत्पत्ति**

मनुष्यस्य सुखदुःखादीनां निर्णीयते सैव होराशास्त्रमित्युच्यते। होराशब्दे हि अहोरात्र शब्दस्य आद्यान्ताक्षरविलोपेन निष्पन्न इति केचिद्वदन्ति अहोरात्रस्य पूर्वान्त्यलोपाद्धोराऽवशिष्यते। इति॥ (पा.हो.शा.-४/ १ )

**शब्दोऽयं फलितज्योतिषार्थे रूढ़ इति मन्यामहे शौकयात्।**
**होरेत्यहोरात्रविकल्पमेके वाञ्दन्ति पूर्वापरवर्णलोपात्।** (वृह.१/३)

<u>भट्टोत्पलमतानुसारेण</u>

मेषाद्यो द्वादशलग्नराशयोः होरात्रान्तर्भूताः लग्नस्य च कालवशाज्ज्ञानम्। लग्नवशाच्छुभाशुभज्ञानम्। अतोऽहोरात्राश्रयत्वात् तत एव होरा शब्दः व्युत्पद्यते। यतः परमतमप्रतिषिद्धमनुमतमिति। वयंतु एतन्न तस्याभिमतमिति मन्यामहे एके पदसूचितत्वात्। सामान्यतः एकापरान्यप्रभृत्तिशब्दैरनभिमतमेवं प्रकाशितं दृश्यते शास्त्रानन्तरेषु। यथा पाणिनि यजुष्येकेषाम् इति सूत्रे। (८.३.१०४)

<u>सारावल्यांअपि वर्णितम्</u>

**आद्यन्तवर्णलोपाद्धोराऽस्माकं भवत्यहोरात्रात्।**
**तत्प्रतिषिद्धः सर्वो ग्रहभगणश्चिन्त्यते यस्मात्॥**

**व्याकरणदृष्टया होरा शब्दस्य व्युत्पत्तिः-**

पाणिनीय व्याकरणानुसारेण हुल्-हुर्-हिंसा संवर्णयोः धात्वानुसारेण होरेति इति पचाद्यच् टापि हूर्यते इति। घय प्रत्यये कृतेसति स्त्रीत्व विवक्षायाम् वा टापि कृते सति होराशब्दस्य निष्पत्तिः भवति। इदमेव स्वरूपः सिद्धिः। अत्र अस्यार्थः क्रियते लग्नं, राश्यर्धं रेखाशास्त्रः भेदः च इति।

लग्नाऽर्थे सारावल्याम् -

**संज्ञा वेश्याष्टमयोश्चतुरतं वैतपश्च नवमस्य।**
**होरास्तदशजलानां चतुष्टयं कष्टकं केन्द्रम॥** (२/२८)

राश्यर्द्धेऽर्थे यथा भावकूतुहले -

**होरा राशिदलं समे प्रथमतश्चन्द्रस्य भानोरतो व्यत्यासा।** (१/८)

रेखाशास्त्र रूपेण यत्र होरा शब्दस्य स्वीक्रियतेः तद्यथा- वृहज्जातके, लघुजातके च प्राप्यते अस्य उदाहरणानि।

**होराशास्त्रस्य भेदाः-**

होराशास्त्रं जातकं, तांजिकं, रमलं, प्रश्नः, स्वप्नश्चेति पञ्चधा विभक्ताः। तेष्वपि सर्वातिशायित्वेन जातकस्यैव प्राधान्याद्यदा कदा होराशास्त्रमेव जातकशब्देनाऽप्याभिधीयते। कल्याणवर्मणानुसारेण -

**जातकमिति प्रसिद्धं यल्लोके तदिह कीर्त्यते होरा।**
**अथवा दैवविमर्शनपर्यायः खल्वयं शब्दः॥** (२/४)

**जातकशास्त्रम्**

जन्मकालिक ग्रहाद्यवस्थितिमाधारीकृत्य जनस्य भूतवर्तमान भाविशुभाशुभाफलादेशः क्रियते तस्य शास्त्रस्य जातकशास्त्रकमिति। जातक शास्त्रे व्यक्ति विशेषस्यःअध्ययनं भवति। तत्र जातकस्य प्रकृति इत्यादिनां अध्ययनम् भवति। अश्विन्यादि नक्षत्रानुसारेण जातकस्य प्रकृतिज्ञानं तथा च आदित्यादि नवग्रहाः मेषादि द्वादश राशिणां प्रकृत्यानुसारेण जातकविषये सूक्ष्मअध्ययनं भवति।

जातकशास्त्रे जन्म नक्षत्र-वासर-तिथि-योग-करण लग्न राश्यादिनां

प्रकृत्यानुसारेण जातकस्य प्रकृति-शुभाशुभ फलज्ञानं भवति। यथा प्रतिपदायां उत्पन्नो जातकः पुण्यात्मा उद्यमी च भवति। द्वितीयायां- तेजः विपुलः वित्तवान् यशोवान् पशुवलयुता भवति। एवमेव प्रकारेण प्रतेक तिथ्यादिनां पृथक-पृथक फलं भवति। एवमेव प्रकारेण रव्यादि सप्तवाराणां मध्ये जन्मवारस्याऽपि फलं भवति। यथा- यदि जातकस्य जन्मवासरः भानुवासरः वर्तते तदा जातकः धनवानः सम्पन्नो पिंगलकेश-लोचन युक्तो भवति। यदि चन्द्रवासरे जातकस्य जन्मं अभवत् तदा जातकः कान्तिमान्, दयावान् एवं कामातुरः भवति। एवमेव प्रकारेण पृथक-पृथक फलं भवति। जातकस्य फलकथन- समये जन्मपत्रिकायाः निर्माणे च जातकस्य प्रकृति निर्णये जन्मनक्षत्रस्य अतीव महत्वं वर्तते। तत्र गण्डान्त नक्षत्रस्य अर्थात् जेष्ठा नक्षत्रस्य समाप्तिकाल एवं मूल नक्षत्रारभं मध्ये प्रहरमेकं वा ७ घटी ३० पालात्मकोसमयमेव गण्डान्त वर्तते।

एवमेव प्रकारेण अश्लेषा मघामध्ये प्रहरमेक कालः तथा च रेवती अश्विन्यांमध्ये प्रहरमेकं गण्डातकालः कथ्यते। गण्डान्त नक्षत्रः जातकस्यकृते अशुभं वर्तते। तथा जेष्ठामूलयोर्मध्ये घटिकामेकं अभूक्त मूलं कथ्यते। अभूक्त मूले जातो जातकः स्वकुलस्य नाशंकरोति इति वृहस्पत्यमतानुसारेण अभूक्तमूलस्य कालविषये नमतैक्यम् महर्षिणां। जातकस्य जन्मनक्षत्र अश्विन्याम् चेत् तदा अतीवबुद्धिः वित्तधनः यशस्वी भवेत्। एवमेव प्रकारेण प्रत्येक नक्षत्रस्य प्रकृत्यानुसारेणं फलं कथितं वर्णितम् च ।

एवमेव प्रकारेण विष्कुम्भादि सप्तविंशति योगानां अपि जातकस्य प्रकृत्यादिनां ज्ञानंभवति। यथा- जातकस्य जन्मयोगः विष्कुम्भः चेत् तदा सः शत्रुजित्ः-वित्त तथा पशुमान् भवति। एवमेव प्रकारेण शेष योगानां अपि फलं भवति।

बवादि करणे उत्पन्न जातकः वालकसदृश बुद्धिमान एवं प्रतापी भवति। एवमेव प्रकारेण मेषादि द्वादश राशिः लग्नानुसारेण जातकस्य प्रकृत्यादिनां शुभाशुभ ज्ञानं प्राप्यते।

जातक ग्रंथरूपेण अष्टादश सूर्यादि ज्योतिष शास्त्रस्य प्रर्वतक मध्ये, भृगुपराशरादिनां सम्प्रत्यपि कतिपये फलित ज्योतिषग्रन्थाः लभ्यन्ते। ज्योतिष शास्त्रस्य आदिप्रर्वतक सूर्यास्याऽपि फलितग्रन्थाः लुप्तः प्रायः। सूर्यारूण

संवादरूपो ज्ञानभास्कर नामक ग्रन्थाऽपि नात्रसुलभा वर्तमान समये तदवदेव भृगुसंहिता नाम एवं पूर्णरूपेण फलित ज्योतिषे अद्वितीय कथ्यते तथापि, सामान्यजनानां कृते पूर्णरूपेण ग्रन्थोऽयं अपि दूर्लभा वर्तते। फलित ग्रन्थानांमध्ये पाराशर मुनिप्रोक्तं बृहत्पाराशरहोराशास्त्रम् प्रसिद्धो वर्तत्रे। अस्यापि हस्तलिखित प्रतिणां पाठभेदाः प्राप्यन्ते। ग्रन्थोऽयम् होराग्रन्थानां मूर्धन्य रूपेण स्वीक्रियते।

नारदीयहोराशास्त्रम्,गर्गसंहिता,मयहोराशास्त्रम् यवनहोराशास्त्रम्, वृद्दजातकम्, सारावली, जातकपारिजातं, जातकभरणादयः,माणित्यहोराशास्त्रम्, जैवहोराशास्त्रम् - सत्यहोराशास्त्रम् -विष्णुगुप्तहोरा शास्त्रम् -सिद्धसेन - यवनेश्वर -बादरायण होराशस्त्रम् इत्यादि अनैके ग्रन्थाः प्रसिद्धा कालक्रमानुसारेण जैमिनिसूत्रम् वृहज्जातकम् -लयुजातकम् जातकसारः सारावली- श्रीपतिजातकपद्धतिः, वृद्धजातकम् भावनिर्णयः जातकपारिजातः - केशवीयजातकपद्धतिः जातकाभरणम् -होरास्कन्धनिरूपणम् -जातकसरः- जातकालङ्कर होरारतन्म् -हौराकौस्तुभः-होरासारसुधानिधिः- भावकुलूहलम् - फलितविचारः इत्यादयः अनेकाः फलितग्रन्थाः प्रसिद्धा सन्ति।

होराशास्त्रस्य निम्नलिखिताः आचार्याः प्रमूखाः सन्ति। तद्यथा -

(1) महर्षि पाराशरः
(2) महर्षि नारदः
(3) आचार्य भृगुः
(4) आचार्य गर्गः
(5) मयः
(6) यवन विद्वांशाः
(7) मणित्थाचार्यः
(8) जीव शर्मणः
(9) सत्याचार्यः
(10) विष्णुगुप्तः
(11) देवस्वामी
(12) सिद्धसेनः
(13) बादरायणः

(14) जैमिनि
(15) वराहमिहिराचार्यः
(16) पृथुयशः
(17) लल्लाचार्यः इत्यादयः।

## ताजिकशास्त्रम्

होराशास्त्रस्य जातकं हि प्रथमो भागस्तथैव ताजिकमस्यापरो भागः। ताजिकं नाम वार्षिकादिनानाविध फलादेश फलकशास्त्रमेव।

यवनाचार्येण पारसीकभाषायां प्रणीतं ज्योतिशास्त्रैक देशरूपं वार्षिका दिनानाविधफलादेशफलकशास्त्रं ताजिक शब्दवाच्यं इति। तदनन्तरभूतैः समरसिंहादिभिः.. ब्राह्मणैस्तदेव शास्त्रं संस्कृतशब्दोपानिबद्धं ताजिकशब्दवाच्यम्। (हायनरत्ने)

**यथोक्तम् ताजिकभूषणे**
**गर्गाद्यैर्यनैश्च रोमकमुखैः सत्यादिभिः कीर्तितं।**
**शास्त्रं ताजिकसंज्ञकं ................................ ॥**

एत्ततु स्पष्टमेव यत्ताजिकशास्त्रं हि यवनगतं यद्वा यवनशास्त्रः सम्बद्धं किं वा यवनाचार्यैराविष्कृतम् इति।

पश्चाद्वर्ति ग्रन्थेषु संज्ञाद्या यवनाएव गृहीता शडकरबालकृष्णेन– शकानन्तरद्वादशकमितः मौसलराज्यस्थापनानन्तरमेव ताजिक शास्त्रमत्र प्रवर्तितमिति तदगणेशदैवज्ञस्यो प्रयुक्तकथनेन न संवदते न च परम्परया। गोचर फलादेशोऽस्माकमेव विषयः। गर्गादिमुनिप्रणीतं ताजिकशास्त्रं सत्याचार्यप्रोक्तताजिक ग्रन्थाश्च, यद्यपि सम्प्रति स्वरूपेण नैवोपलभ्यन्ते, तथापि ततो गृहीतान्युद्धरणानि तु यत्र तत्र दृश्यन्ते इव।

शकानन्तरद्वादशतमितः भारते ताजिकशास्त्रं प्रविष्टमिति। ग्रहाणां हि जन्मलग्नवसाद्यत्फलं यच्च तात्कालिक राशिवशात् फलमुभे, एव फलितज्योतिषस्य दक्षिणवामलोचने।

वस्तुतःताजिकशास्त्रे संज्ञातन्त्रयं, वर्षतन्त्रम्, प्रश्नतन्त्रञ्चेति त्रीणिविषयानि निरूपितानि प्राप्यन्ते। वस्तुतः अस्यशास्त्रस्य वार्षिकतन्त्र प्राधान्येन। संज्ञाप्रश्नतन्त्रे

तु पूरके एव। ताजिकग्रन्था: अस्माभि: श्रुता दृष्टाश्च, तेषां नामानि अधोलिखितरूपेण प्रस्तूयतेमया –

ताजिक शास्त्रस्य प्रधानग्रन्था:

(1) ताजिक तन्त्रसार (2) दैवज्ञालङ्कृति (3) केशवीयताजिक पद्धति (4) ताजकसार: (5) ताजिकभूषण पद्धति: (6) सिंहलताजिकम् (7) हायनरत्नम् (8) ताजिकनीलकण्ठी (9) ताजिक भूषानिधि (10)ताजिककौस्तुभ: –

ताजिकशास्त्रस्य ये प्रधान विद्वांशा: आचार्यश्चसन्ति तेषां नामानि इमानि सन्ति –

(1) यवनाचार्य:
(2) गर्गाचार्य:
(3) सत्याचार्य:
(4) आचार्य समरसिंह:
(5) आचार्य तेजसिंह:
(6) आचार्य केशव:
(7) आचार्य हरिभट्ट:
(8) आचार्य ढुण्ढिराज:
(9) सिंहलाख्य:
(10) वलभद्र:
(11) नीलकण्ठाचार्य:
(12) वालकृष्ण:
(13) नारायण:

## प्रश्नतन्त्रम्

होराशास्त्रस्य अपरमङगरूपेण प्रश्नतन्त्रं स्वीक्रितम्। प्रश्नलग्नमाधारीकृत्य शुभाशुभ फलादेशकशास्त्रमेव प्रश्नशास्त्रमिच्युच्यते। अत्र प्रश्नसमयाधारिकृत्य ततकालिक लग्नात् फलादेश भवति। अस्मिन् शास्त्रे

प्रश्नकालिक कालस्य प्राधान्यं वर्तते। अत: शास्त्रोऽयं प्रश्नतन्त्ररूपेण प्रसिद्धं वर्तते। उक्तम् च-

**दैवज्ञस्य हि दैवेन सदसत्फलावाच्छया।**
**अवश्यं गोचरे मर्त्य: सर्व: समुपनीयते॥**
**अश्रोषीच्च पुरा विष्णोर्ज्ञानाय समुपस्थित:।**
**वचनं लोकनाथोऽपि ब्रह्मा प्रश्नादिनिर्णयम्॥** इति ॥ (ता.नी.)

शास्त्रोऽयं लग्नकुण्डल्यां सदृश प्रश्नकालाधारिकृत्य लग्नराश्यादि ज्ञानपूर्वकं शुभाऽशुभ फलकथनं कृतम्। सम्प्रति षटपञ्चाशिका -ताजिक निलकंठी ग्रन्थस्य प्रश्नतन्त्र, केरलप्रश्नतन्त्रम् इत्यादय: सुलभा:प्रसिद्धा:ताजिकग्रन्था:। अस्मिन् शास्त्रे प्रमुखरूपेण गमागम- जयपराजय- शुभाशुभ-प्रवासचिन्ता-नष्टप्राप्ति-मिश्रिकाख्या इत्यादिनां प्रशनानाम्,समाधानम्, प्राप्यते।

षट्पञ्चाशिका, पश्ननारदी, प्रश्नज्ञानम्, प्रश्नसार:, प्रश्नमाणिक्यमाला, केरलमतंत्रम् इत्यादि प्रमुखा: ग्रंथा: वर्तते।

## (3) रमलशास्त्रम्

पाशकविद्या हि रमलशास्त्रम् उच्यते। रमलशास्त्रे निर्दिष्टकोष्ठकेष्वन्यतमस्य स्पर्शे वा वरणे या स्थितिर्घटते तदनुसारेण फलकथनमेव अस्य शास्त्रस्य प्रमुखप्रतिपाद्यविषय: वर्तते।

प्रश्नविद्याङ्गत्वेन रमलशास्त्रमपि प्राक्काले समुदितं यवनेषु विकसितमिति यवनानाम्परिचयरूपेण रमलशब्देन प्राप्यते। रमल इत्यस्य शब्दनिष्पति: रमते इति रम: पचाद्यच् लाति ल: ड्वत: रमस्य ल:रमल:। इति।

भट्टोत्पलस्य रमलग्रन्थ एव प्रथमत्वेन प्राचीन पौरूषेय ग्रन्थरूपेण गृह्यते भट्टोत्पलस्य प्रश्नज्ञाने एवं रमलविषयोऽपि समावेशित: स्यात् इति सम्भाव्यते। आफ्रेच सूच्यां भट्टोत्पल श्रीपतेश्च प्रणीतो रमल ग्रन्थ: आसीदिति किन्तु सुधाकरस्तुदुपेक्षते।

रमलशास्त्रंमापि अन्य शास्त्राण्यवत् समृद्धं लोकोपकारि च अस्ति। अस्य

शास्त्रस्य ये प्रसिद्ध ग्रन्था: सन्ति तेऽत्र प्रस्तूयते।

(1) भटोत्पल रमलग्रन्थ: - भटोत्पल:

(2) श्रीपति रमलग्रन्थ: - श्रीपति:

(3) रमलचिन्तामणि: - चिन्तामणि:

(4) रलमामृताख्य: - जयराम:

(5) रमलनवरत्न: -परमसुखोपाध्याय:

## स्वप्नशास्त्रम्

प्रायोह्यत्र स्वप्ननिरूपणे वेदब्राह्मणोपनिषत्सूत्र पुराणेतिहास। युवैदधर्मशास्त्रागमकव्यलोक व्यवहारवचनान्युपादाय स्वप्नस्य स्वरूपं तदधिष्ठानादीनि भेदं फलं प्रप्तीकारोपायश्चेति वित्रिच्य सविस्तरं सर्वमुपन्यस्तम् अनन्तरं ‍ैद्धजैनवैदान्तादि षड्दर्शनानां मतेन ज्यौतिषदृष्टया च स्वप्नस्वरूपादिविचारो विहित:। सङ्ग्रह: दृष्ट्या मनोवैज्ञानिकानां परेषां विवेचकानाञ्च मतेन समासत: स्वप्नं विविच्य कतिपययैरेव शब्दै: पाश्चात्यपौरस्यत्यमतयो: पर्यालोचनं कृतम्, विशेषतो: भारतीयपद्धत्यनुसारेणैव विवेचनम्। न ह्यस्मिन् निबन्धे सर्वेषमेकत्र समीक्षा अपितु तत्तन्मतनिरूपणावसर एव।

यद्यपि स्वप्नविषयमादाय वेदमारभ्य काव्यं यावत् संस्कृतवाङ्मये बहुषु स्थलेषु स्वपन्स्य विवेचनमस्ति तथा च स्वातन्त्रेण विषयेऽस्मिन् संस्कृतभाषायां हिन्दीभाषाया मन्यासु च प्रदेशीयभाषासु विद्वदभिविरवितानि बहुनि पुस्तकान्युपलभ्यन्ते। आङ्गलभाषायां पाश्चत्यैर्मनोवैज्ञानिकौर्मनो स्वतन्त्रा ग्रन्थाश्र्च विरचिता:।

विद्यते जगत्यस्मिन् प्राणिनां खलु व्यवहारिको जाग्रत्स्वप्नसुषुप्त्यभिधेया त्रिविधा दशा सर्वपरिचिता विहायालौकिकीं तुरीयां दशाम्। तत्र जाग्रदशायां यावत् क्षैत्रं वर्तते ततो विसालतरं क्षैत्रं स्वप्नदशाया अस्ति, यतो जाग्रति इन्द्रियापेक्षे वस्तुन्येव मनो रमते, तत्र मनस: पारतन्त्र्यात्। स्वप्ने तु इन्द्रियोपैक्षैव नास्ति। अत: स्वातन्त्र्येण सर्वत्र गन्तुं मनो विशालं क्षैत्रमधिकरोति, दृष्टमदृष्टं सर्वमनुभवति।

आर्यधर्माणां प्राचीनकालादारभ्य वेदपुराणदर्शनसाहित्य धर्मशास्त्रादि - ग्रन्थष्वपरधर्मावलम्बिनां ग्रन्थेषु च सुस्पष्टं स्वप्नवर्णनं स्वयमेव प्रकट्यति स्ववेदनीयत्वं रहस्यात्मकत्वं परमावश्यकत्वश्च तस्मात् सुस्थिरं मन्ये यत् स्वप्नविमर्श आवश्यक एवं मानवानां जीवने हिताय। विज्ञान विषय केषु विषयोऽय बहुधा विचारित:स्वतन्त्रता ग्रन्थाश्च।

वेदेष्वर्थवेदस्य पूर्णे षोडशकाण्डे, अन्यकाण्डेऽपि केषुचित सूक्तेषु मन्त्रेषु च अपरेष्वपि ऋग्वेदादिषु स्वप्ना-वर्णिता:।

**स्वप्नशब्दस्य को अर्थ:**

शयनार्थकात् ष्वप् धातोर्भावार्थकेन नन् प्रत्ययेन निष्पन्न: स्वप्नशब्द: स्वप्न:-स्वाप-सुषुप्ति-शायन सप्रसाद निद्रादिपर्याय:। यद्यस्य्येकस्या एवं प्रकृतेरेकार्थप्रत्येयद्वयेन निष्पन्नयो: स्वप्नसुषुप्तिशब्दयो: शास्त्रे पर्यायतो व्यवहारभेद: प्रतीयते तथापि लोके विभिन्नार्थेषु शास्त्रे च विभिन्नावस्थासूभयो: शब्दयो: प्रयोगाद् व्यवहारिकौ भेद एवपोलभ्यते। स चेत्थम् -बाह्येषु करणेषूपसंहृतेषु जागरितवासनानुसारेण मनस्तदर्थाभाषाकारा: भासनं स्वप्नशब्दितम्। यथाहु:-

**इन्द्रियाणामुपरमे मनोऽव्युपरतं यदि।**
**सेवते विषयानेव तं विद्यात् स्वप्नदर्शनम्।**

(महाभारत शा.प. २/७५/२४)

स्वप्नस्तु मानसोल्लास: इति।

(त्रिपुरार ज्ञा.ख. ९/४७)

जाग्रतस्वप्नभोगद्वये। श्रान्तस्य सव सनस्यान्त: करणस्य कारणात्मना स्थिति: सुषुप्ति:। तदुक्तम -

यत्र सुप्तो न कञ्चन कामं कामयते तत् सुषुपतम्।

(श्री विद्यातारकोपनिषद्)

अभावप्रत्ययावलम्बना वृत्तिनिद्रा

(यो.स.१/१०)

सर्वविशेषविज्ञानप्रत्यस्तमयी सुषुप्ति:

(भामती ३/२/२७)

स्वप्नश्चायुर्वेदे सप्तविध: कथित: दुष्टश्रुतानुभूत

प्रार्थितकल्पितभाविकदोषजभेदात्। क्वचास्याष्टविधत्वं पञ्चविधत्वञ्चापि वर्णितम्। दृष्टस्य पदार्थस्य दर्शनं प्रथमः श्रुतुस्य वस्तुनो दर्शनं द्वितीयः अनुभूतस्य पदार्थस्य दर्शनं तृतीयः। एते हि दृष्टश्रुतानुभूताः पदार्था इह जन्मनि संस्थिता जन्मान्तरे वा ते सर्वेऽप्यत्र विषयत्वेनाधिकृताः सन्ति-

अदृष्टमप्यर्थमदृष्टवैभवात् करोति सुषुप्तिर्जनदर्शनातिथिम्। इत्युक्ते (नैवेधे १/३९) देवविशेषात् प्रार्थितस्य वस्तुनो दर्शनं चतुर्थः, मनसा कल्पितस्य दर्शनं पञ्चमः भविष्यतकालिकवस्तुसूचकः षष्ठः कफवातपित्तस्थानसमयदशाभयमनोदोषजातः सप्तमः एवं च भेदः कारणत आकृतिश्च जायते।

फलाफलभेदेन स्वप्नो दिविधः-सफलो विफलश्च। तत्र दृष्टश्रुतानुभूतप्रार्थित कल्पिताः पञ्च स्वप्नाः दिवास्वप्नः, अतिह्स्वः, अतिदीर्घः, प्रकृतिजः, विस्मृतः, भयवेगरोधरोगचिन्ताजन्या, नग्नादिदृष्टाःस्वप्ना विफलाः। अन्यौ द्वौ भाविकदोषजौ सफलौ, तावपि कालदेशावस्था-दितारतम्येनोऽलधिकशीघ्र विलम्बरूपैश्च सफलौ। सफला अपि स्वप्नाः काकतालीयन्यायेन फलन्तीतो केषाञ्चिन्मतम -

फलन्ति काकतालीयं तेभ्यः प्राज्ञा न विभ्यति। (वेणिसंहारे २/१५)

भाविन्या घटनाया जिज्ञासावशादपि मानवो येनकेनापि प्रकारेण बहुविधं तर्केषु तेषु प्रकारेष्वेकः स्वप्नप्रकारोऽपि वर्तते। अतो भाविजिज्ञासापि स्वप्नस्य शुभाशुभसूचकत्वे हेतुः। एषा विचार पद्धतिः केवले भाविके स्वप्ने एवं संगता नतु दोषज नापातरेषु पञ्चषु।

सफला स्वप्ना नहिकेवलं दृष्टा एव फलं प्रयच्छन्ति, अपितु स्वजनेन दृष्टाः संबन्धिदृष्टाः मित्रदृष्टाश्च फलं ददति -

सुहृदो यांश्च पश्यन्ति व्याधितो वा स्वस्य तथा। इति (सुश्रुतो रू. २९ए.५५श्लो)

शुभाशुभफलभेदेन सफलोऽपि स्वप्नो द्विविधः सुस्वप्नो दुःस्वप्नश्च। तत्र यो दर्शनसमये द्रष्टुः सुखं जनयन् भावि भद्रं सूचयति स सुस्वप्नः। यथा मनोरमदिदर्शनम्। यश्च् दर्शन समये द्रष्टुर्दु द्रष्टुः सुखं जनयन् भावि भद्रं सूचयति स सुस्वप्नः। यथा मनोरमदिदर्शनम्। यश्च दर्शन समये द्रष्टुर्दुः खं जनयन् भाव्यरिष्टं सूचयति स दु स्वप्नः। यथा खकरभगर्द भानरूद्च

दक्षिणदिग्गमनमित्यादि।

एवं सति केश्चित स्वप्नदर्शनं त्रिविधं मन्यते – अपार्थकम्, यथाधर्म, अन्यार्थञ्चेति। वैशेषिक अपि त्रैविध्यमङ्गीकुर्वन्ति –किञ्चित् संस्कारपारवात् किञ्चिद् वातपित्तादिदोषात्, किञ्चिददृष्टवशादिति। नैयायिका इत्थं वदन्ति भयोप संहित:, प्रमोदोपसंहित:, उभयविपरीतश्चेति स्वप्नस्त्रिवध:। ज्यौतिषकोविदा जन्मकुण्डलीस्थग्रहवशाद् विभिन्नप्रकारकस्वप्नानां दर्शनं तेषां शुभाशुभफलञ्चामनन्ति। भारतीय वाङ्मये यत्र यत्र शुभाशुभ स्वप्नविचार चर्चा वर्तन्ते, तत्र –तत्र अशुभफलविद्यायिनां स्वप्नानां दोषनिवृत्तये बहव उपाया स्नान-दान-हवन विष्णु ब्रह्मेशानार्कगी द्विजपूजन गजेन्द्रमोक्षस्त्रवादयोऽ्पि निरूपिता:। येषां कारणेन अरिष्ठशान्ति: शुभावाप्रिश्च भवत:।

प्रसङ्गाद दार्शनिकदृष्टया किमच्युच्यते – अद्वैत दर्शनानुसारेण ब्राह्मणोऽ्तिरिक्तस्य निखिलस्य प्रपञ्चस्य मायामयत्वात् स्वाप्निकस्यापि वस्तुनो मायामयत्वं सुस्थिरम्। मायामयत्वेऽ्प्यस्य नास्त्रि जगत्प्रपञ्चवद् व्यावहारिकत्वम् अपि तु प्रातिभासिकत्वमेव। व्यवहारिकपदार्थे यादृशी चिरि स्थायिता यादृश्या: साधनासामग्रयो न तादृशी दशा स्वप्निकेषु अपित विलक्षणैव। तदित्थम – यत्र व्यावहारिकसगौड्विधातिरिक्त दोषाड्जन्यो ब्रह्मसाक्षात्कारोदयं यावदनुवर्तत्रे। निवर्तते च ब्रह्म साक्षात्कारात् तत्र स्वाप्निक: सर्ग आगन्तुक निद्रादि दोषजन्य: प्रबोधं यावदनुवर्तत्रे प्रवोधात् प्रत्यहं निवर्तते यथा काचादिदोषजन्यं शुक्तिरजतम्। उक्तञ्च

शुक्तिरूप्यवत् स्वप्नोलब्धस्थादयोऽ्पि प्रतिभासिका
यावत् प्रतिभासमवतिष्ठन्ते इति (वे.प.प्र.खं ६५ पृ.चौ. .९४)

अस्य स्वाप्निकपदार्थ स्योपादान विषये साक्षान्मूलाविद्यैव जाग्रत्पदार्थस्योवास्ति, इति केषाञ्चिन्मतम्

(वे.प.प्र.ख ६७ पृ.) अन्त: करणद्वारा इत्यन्येषां मतम्। (वै.प्र.खं. ६८ पृ)

भारतीय वाङ्मये वृहदारण्याकाद्युपनिषदां तदभाष्याणां च अध्ययने प्रतिभाति यदेष वैज्ञानिक सिद्धान्तोऽ्पि सूक्ष्मरूपेण तत्र निरूपितो वर्तत्रे। तद्यथा स्पवनेन शारीरमभिप्रहत्यासुप्त: सुप्तानभिचाकशीति। शुक्रमादाय पुनरैति स्थानं हिरण्यमय:

पुरूषः एकहंशः ॥

(वृ.उ.४/३/११)

तथा च भाष्यम्(तत्रैवशाङ्करम्) स्वप्ननेन स्वप्नभावेन, शारीरं शरीरम् अभिप्रहत्य निश्चेराष्मापाद्य... सुप्तः, स्वयमलुप्तदृगादिशाक्तिस्वाभाव्यात् सुप्तान् भासनाकरोद भूतान्तः करणवृत्याश्रयान्, ब्राह्याध्यात्मिकान् सर्वानेव भावान् स्वेन रूपेण प्रत्यस्तमितान् सुप्तान् अभिचाकशीति अतुप्रया आत्मादृष्टया पश्यत्यवभासयतीत्यर्थः। शुक्रं शुद्धं ज्योतिषष्मदिन्द्रियमात्ररूपमं आदाय गृहीत्वा, पुनः कर्मणे जागरितस्थानम् एति आगच्छति इत्यादि।

एतेन प्रतीयते यत् पाश्चात्यमनवैज्ञानिकाना स्वप्नविषयक सिद्धान्तो न सर्वथा नवीनः ? यदि ते मनोवैज्ञानिक शिरोमणयो मनोविज्ञानसख्या स्वप्नमधीत्य प्रयोगेण यान्त्रेण च समीक्ष्य तत् सिद्धान्तं स्थिरीकृतवन्तसत्र योगेन विमलेन मनसा कृतसर्वसाक्षात्कारा भारतीयदार्शनिक मनीषिणो दार्शनिकपद्धत्या साधु विमृथ्य साङ्गोपाङ्गं व्यवेचयन्।

=======================------------------------------

=============================================

## ३ द्वादशलग्नानाम् फलकथनम् (विविधाचार्यमतेषु)

श्रीदैवज्ञ वैद्यनाथेन विरचित जातकपारिजातके नवमेध्याये मेषादि लग्नानां फलनिरूपणम् कृतम् । तद्यथा-

**मेष -**

यदि जातकस्य जन्म मेष लग्ने स्यात् तदा सः जातक बन्धु द्वेषकरः, अटनपरः, कृशतनुः, क्राधिः, दुर्बलजानुः, स्थिरधनी, मानी, शूरवीरश्च भवेत् । परन्तु दतेव मन्त्रेश्वर विरचित फलदीपिकायां किञ्चित् अधिकं वर्णनं कृतम् - जलात् भीरुः, शरीरे व्रणादीनां चिन्हम् अंकितं दृश्यते । मनसागरी ग्रन्थे च पूर्वोक्त फलमेव प्राप्तमिति।

**मेषलग्ने समुत्पन्नश्चण्डो मानी धनी शुभः।**

## वृषभ -

### वृषभ लग्ने जातोजातकः मन्त्रेश्वारानुसारेण -

त्यागी, क्षमाशीलः, परिश्रमी, गोपशुयुक्तः, युवावस्थाम्, वृद्धावस्थांश्च, सुखी, पार्श्वेअंकयुतो, कृषिकर्मेरतः भवेत्। दैवज्ञवैद्यनाथानुसारेण पूर्वोक्तातिरिक्त देवगुरु द्विजानां अर्चनेरतः स्वल्प संततियुक्तः, शान्तचित्तः, कामुकः, विद्वान्, यायावरश्च इत्यादयः। अपरं च मानसागरी ग्रन्थे - स्वचित्तरोगी, शस्त्राभिघातं प्राप्यते।

**वृषलग्नोद्भवो विप्रगुरुभक्तः प्रियंवदः ।**
**गुणी कृती धनी लोभी शूरः सर्वजनप्रियः ।।मा.सा.।।**

**पृथूरुवक्त्रः कृषिकर्मकृत्स्यान्-**
**मध्यान्तसौख्यः प्रमदाप्रियश्च ।**
**त्यागी क्षमी क्लेशसहस्रश्च गोमान्**
**पृष्ठास्यपार्श्वे..ंकयुतो वृषोत्थः ।।फ.दी.९/२।।**

**गोमान् देवगुरुद्विजार्च्चनरतः स्वल्पातमजः शान्तधी-**
**र्विद्यावादरतो..टनश्च सुभगो गोलग्नजः कामुकः ।।१०५।।जा.पा.।।**

## मिथुन -

मिथुनोत्पन्नो जातकः अतिगौरः, स्त्रीरतः, नृपपीड़ितः, दूतकर्मे कुशलः प्रशन्नोभावः विचक्षणवरः केशयुतः गायकः, विनीतश्च, भवेत्। फलदीपिकायां प्राप्यतेयत् - श्यमचक्षुः, तीक्ष्णबुद्धिः दीर्घनासिका च । भोगी, स्वजनानुरक्तः, दयालुः गुणवान् तात्विकः रोगी एतेगुणाः जातकस्य, जातकपापिजाते अन्याचार्याणां मतात् भिन्नं दृश्यते।

मिथुनोदय संजातो मानी स्वजनवल्लभः ।
त्यागी भोगी धनी कामी दीर्घ सूत्रो..रिमर्दनः ।।मा.सा.।।

श्यामेक्षणः कुञ्चितमूर्द्धजः स्त्रीक्रीड़ारतश्च परेङ्गितज्ञः ।
उत्तुंगनासः प्रियगीतनृत्तो वसन् नदान्तः सदने च युग्मे ।।फ.डी.९/३।।

भोगी बन्धुरतो दयालुरधिकः श्रीमान् गुणी तत्त्वविद् ।
योगात्मा सुजनप्रियो..तिसुभगो च युग्मोदये ।।जा.पा.।।

**कर्कटः -**

**कर्कलग्ने उत्पन्नोजातकः वैद्यनाथानुसारेण -**

मिष्ठान्नप्रियः, सुवस्त्रः, भूषणोयुक्तः, मृदुभाषी, धर्मात्मा, स्थूलकलेवरोयुतः, अन्ये जनानां गृहे विशेषप्रीतिः जायते।

फलदीपिकायां विशेषतया कथितं यत् कर्कोदये जातः स्त्रीनिर्जितः, पीनगलः, सन्मित्रयुतः, धनाढ्यः, अनेकभवनयुतः, स्थूलकटिः, ह्रस्वतनुः, जलविहारयुतः, बुद्धिमानः, अल्पपुत्रः वर्तते।

पूर्वोक्तयोः आचार्ययोः अपरे मतम् मानसागरी ग्रन्थे दृश्यते- गौरवर्णः, पित्ताधिकः,

दानी, सेवकानां प्रियः, क्षमाशील, शुचिः भवेत्।

कर्कलग्ने समुत्पन्नो धर्मी भोगी जनप्रियः।
मिष्ठान्नपानभोक्ता च सौभाग्यधनसंयुतः ।।मा.सा.।।

स्त्रीनिर्जितः पीनगलः समित्रो बह्वालयस्तुङ्गकटिर्धनाढ्यः ।
ह्रस्वश्च वक्रो द्रुतगः कुलीरे मेधान्वितस्तोयरतो अल्पपुत्रः ।।फ.दी.९/४।।

मिष्ठान्नाम्बरभूषणो ललितवाक्कापट्यधीर्धर्मवान् ।
जातः स्थूलकलेवरो अन्यभवनप्रीतिः कुलीरोदये ।।जा.पा.।।

**सिंहः -**

जातकस्य जन्मलग्नः यदि सिहः स्यात् तदा पाण्डुवर्णः, वातपित्तप्रकृतिः, प्रवाशेरतः अमिषप्रिः तीक्ष्णस्वभावः, प्रगल्भः, शूरः एतेगुणाः मानसागरी ग्रन्थे प्राप्यन्ते। फलदीपिकायां अपि एतदेव वर्णनम् प्रप्यते । किन्तु तत्र किञ्चितवृद्धिः दृश्यते तद्ता पीलने पिंगलनेत्रः स्थूलहनुः विशालवक्त्रः अभिमानी, पराक्रमयुतः वनशैलगामी, शथीरधीः, क्रोधिश्च।

राजवशीकरो, रिपुजितः, कामी एते गुणाः फलदीपिकायां अधिकं दृश्यते।

**सिंहलग्ने समुत्पन्नो भोगी शत्रुविमर्दकः।**
**स्वल्पोदरो..ल्पपुत्रश्च सोत्साही रणविक्रमी ।।मा.सा.।।**

**पि ङ्गेक्षणः स्थूलहनुर्विशालवक्त्रो..भिमानी सपराक्रमः स्यात् ।**
**कुप्यत्यकार्ये वनशैलगामी मातुर्विधेयः स्थिरधीर्मृगेन्द्रे ।।फ.दी.।।**

**जातः सिंहविलग्नके..ल्पतनयः सन्तुष्टधीर्हिंसकः ।**
**शूरो राजवशीकरो जितरिपुः कामी विदेशं गतः ।।जा.पा.।।**

**कन्या -**

**कन्यालगनभवः क्रियासुनिपुणः श्रीमान् सुधीः पण्डितः ।**
**मेधावी वनिताविलासरसिको बन्धुप्रियः सात्त्विकः ।।जा.पा.।।**

**स्रस्तांसबाहुः परवित्तगेहैः**
**संपूज्यते सत्यरतः प्रियोक्तिः।**

**व्रीडालसाक्षः सुरतप्रियः स्या-**
**च्छास्त्रार्थविच्चाल्पसुतो.. ङ्गनायाम् ।।फ.दी.।।**

**कन्यालग्ने भवेज्जातो नानाशास्त्रविशारदः ।**
**सौभाग्यगुणसम्पन्नः सुरूपः सुरतप्रियः ।। मा.सा.।।**

जातकस्य लग्नः यदि कन्या स्यात् तदा तस्य प्रकृतिः कफ, पित्तश्च भवति। तथा सः सुशील स्त्री इव स्वभाववान् भवति। कन्या लग्नस्य जातकः लक्ष्मीप्रियः, स्त्रीवशः, भयभीतः, मायावी, तथा कामपीड़ितः भवति। इति तु मानसागरी ग्रन्थानुसारेण।

जातक पारिजातक ग्रन्थानुसारेण कन्याराशिलग्नोत्पन्नः जातकः कार्यकुशलः भोग-विलासेनिपुणः, धनवान्, बुद्धिमान्, स्वजन-बन्धुबान्धवानी प्रेमी तथा तस्य वृत्ति सात्त्विकः भवति।

यदि जन्म-समये कन्या लग्नः अथवा तु चन्द्रः कन्या राशि स्थितः स्यात् तदा जातकः सत्यवादी, वाक्प्रियः भवति। सः विद्वान् तथा अन्यन्य द्रव्यः लाभ ग्रहणं करोति। इति तु फलदीपिकायाम्।

तुला -

तुला लग्नोत्पन्नजातकः कफप्रकृतिकः सत्यवक्ता, परस्त्रीगामि, राजमान्यः, देवानां आराधकः भवति। इति तु मानसागरी ग्रन्थे।

फलदीपिकाधारेण तुला लग्नोत्पन्नः जातकः देवतानां ब्रह्मणानांभक्तः किन्तु चंचल तथा च तस्य शरीरः कृशकायः भवति। जातकः बुद्धमान् धैर्यवान् विशालकायः न्यायप्रियः तथा द्वौनामधारकः भाग्योदयः विलम्बेन भवति।

**तुलालग्नोदये जातः सुधीः सत्कर्मजीविकः।**
**विद्वान् सर्वकलाभिज्ञो धनाढ्यो जनपूजितः।।मा.सा.।।**

**चलत्कृशाङ्गो..ल्पसुतो..तिभक्तो**
**देवद्विजानामटनो द्विनामा।**
**प्रांशुश्च दक्षः क्रयविक्रयेषु**
**धीरोए..दयस्तौलिनि मध्यवादी ।।फ.दी.।।**

**ललितवदननेत्रो राजपूज्यश्च विद्वान्**
**मदनरतिविलोलः स्त्रीधनक्षेत्रशाली।**
**विरलदशनमुख्यः शान्तबुद्धिर्विषादी**
**चलमतिरतिभीरुर्जायते तौलिलग्ने ।।जा.पा.।।**

**वृश्चिक :**

मन्त्रेश्वरस्य फलदीपिकायां वृश्चिक लग्नात्पन्नः जातकस्य फलं निर्दिष्टम् यत्- विशालनेत्रः, पृथुवक्षः, वृत्ताकारः जंघः, अब्जादि रेखांकितः, पाणिपादौ, बाल्यावस्थायां रोगी, गुरुपितृरहिताश्च, क्रूरकर्मेरतः, राजकुलाभिमुख्यः इति।

मानसागरी ग्रन्थे किञ्चित् अधिकं फलं प्राप्यते तद्यथा वृद्धस्वभावः, शास्त्रेनिरुक्तः,शत्रुजितश्च।

वैद्यनाथेन अपि किञ्चित् वृद्धिकरं फलं वृश्चिक फलं लग्नस्य वर्णितं- मूर्खः, अतिचपलो, अभिमानी, विद्वान् - स्वजनानां द्वेषी भवेत्।

**वृश्चिकोदयसञ्जातः शौर्यवान् धनवान् सुधीः।**
**कुलमध्ये प्रधानश्च विवेकी सर्वपोषकः ।।मा.सा.।।**

**वृत्तोरुजङ्घः पृथुनेत्रवक्षा**
**रोगी शिशुत्वे गुरुतातहीनः ।**
**क्रूरक्रियो राजकुलाभिमुख्यः**
**कीटे..ब्जरेखांकितपाणिपादः ।।फ.दी.।।**

**धनुः -**

धनुलग्नस्य फलं वैद्यनाथेन कथितम् यत् - पराज्ञः, स्वकुले श्रेष्ठः, यशोवित्तवान् च जायते।

मानसागरी ग्रन्थे तत् लग्नस्य फलं कथितंयत् - राजप्रियः, कार्येप्रवीणः, द्विजतेवरक्तः, तुरङ्गप्रियः, तुरङ्गजङ्घः सदृशं जातकस्या..पि जंघ भवेत्।

मन्त्रेश्वर द्वारा विरचित फलदीपिका ग्रन्थे धनुलग्नस्य फलं इत्थं प्रकारेण दृश्यते- जातकस्य सासिका, कणठः, कर्णश्च दीर्घं भवेत्। सदेव कर्मप्रवीणः वाक् प्रगल्भः दक्षो वा त्यागीश्च, कृशशरीरः साहसी शत्रुहन्ता बलाढ्यः राजप्रियः सामकर्मेण एतादृशैः जातकैः स्वकीयकार्यं साधयितुं शक्यते।

**धनुर्लग्नसमुत्पन्नो नीतिमान् धनवान् सुधीः।**
**लोके मान्यः कुले श्रेष्ठः पुत्रपौत्रादिसंयुतः।।९।।**

**दीर्घास्यकण्ठः पृथुकर्णनासः**
**कर्मोद्यतः कुब्जतनुनृपेष्टः।**
**प्रागल्भ्यवाक्त्यागयुतो..रिहन्ता**
**साम्नैकसाध्यो..श्विभवो बलाढ्यः ।।फ.दी.।।**

**मकरः -**

मन्त्रेश्वरेण स्वकीय ग्रन्थे मकर लग्नस्य फलैः उक्तम् - शरीरस्य अधोभागेः कृशः भवेत्। सत्त्वयुक्तः, आलसोयुतः अगम्यास्त्रीषुरतः धर्मध्वजः यायावरः भाग्यवानः विलज्ञः वातरोगी च भवेत्।

इदमेचलग्नस्य वैद्यनाथाचार्यानुसारेण शठः दीनवाणी च फलं विशेषतयाकृतम्।

मानसारयां - भीरुः पापरतः धूर्तः कफवातरोगी दीर्घशरीरः परवञ्चकः जलविहारे प्रभान्नः अधिकं फलं प्राप्यते।

**मकरोदयसंजातो नीचकर्मा बहुप्रजः।**
**लुब्धो..लसो व्ययी चैव स्वकार्ये च कृतोद्यमः।।मा.सा.।।**

**अधः कृशः सत्त्वयुतो गृहीत-**
**वाक्यो..लसो..गम्यजराङ्गनेष्टः।**
**धर्मध्वजो भाग्ययुतो..टनश्च**
**वातार्दितो नक्रभवो विलज्ञः।।फ.दी.९/१०।।**

कुम्भः -

मानसागरी ग्रन्थकारेण कुम्भलग्नस्य फलम् कृतम्यत्- जनवल्लभः कृशशरीरः स्त्रीषुप्रियः शिष्टाचारी स्थिरस्वभावः वाताधिकः जलक्रीडायां संलग्नः च भवेत्।

फलदीपिकायां कुम्भ लग्नस्य फलं इत्थं प्रकारेण प्राप्यते - प्रच्छन्नपापी लोभी परधने रतः क्षयवृद्धिः घटतुल्य शरीरः विद्यातदक्षः अल्पवित्तः गन्धपुष्पप्रियः जायते।

जातकपारिजाते च कुम्भलग्नस्य फलम् ग्रन्थकारेण कृतम्यत् परवधूरति केलिलोलः कृपणः धनवान् कुटिलः य भवेत्।

**कुम्भलग्ने नरो जातः स्थिरचित्तो..तिसौहृदः।**
**परदाररतो नित्यं मृदुकायो महासुखी ।।मा.सा.।।**

**प्रत्छन्नपापो घटतुल्यदेहो**
**विघातदक्षो..ध्वसहो..ल्पवित्तः।**
**लुब्धः परार्थी क्षयवृद्धियुक्तो।**
**घटोद्भवः स्यात्प्रियगन्धपुष्पः।।फ.दी.।।**

**अन्तःशठः परवधूरतिकेलिलोलः**
**कार्पण्यशीलधनवान् घटलग्नजातः।।जा.पा.।।**

**मीनः** -

वैद्यनाथेन स्वकीय ग्रन्थे मीनलग्नस्य फलम् उक्तम् यत्- रतिक्रियानुरक्तः मित्राणांनुकूलः तेजस्वी, बलयुक्तः धनधान्यश्च सम्पन्नः विद्वानो च भवेत्।

मन्त्रेश्वरेण इदमेव फलं उक्तम् इत्थम् प्रकारेण- समचारुदेहः सुनेत्रः कृतज्ञः स्वदारगतः जलवित्तभोक्ता शत्रुजितश्च जायते।

मीनलग्नस्य फलं मानसागरीग्रन्थकारेण उक्तम् यत् जलप्रियः प्रचण्डः पण्डितः पित्ताधिकः सूक्ष्मतनुः यशस्वी विनीतः सुरतानुकूलः कीर्तिसमन्वितश्च ज्ञेयम्।

**मीनलग्ने समुत्पन्नो रत्नकाञ्चनपूरितः।**
**अल्पकामः कृशश्चैव भवेद्दीर्घविचिन्तकः।।मा.सा.।।**

अत्यम्बुपानः समचारुदेहः
स्वदारगस्तोयजवित्तभोक्ता।
विद्वान्कृतो..भिभवत्यमित्रान्
शुभेक्षणो भाग्ययुतो..न्त्यराशौ ।।फ.दी. ९?१२।।

मीनोदये..ल्परतिरिष्वजनानुकूल-
स्तेजो बलप्रचुरधान्तधनश्च विद्वान् ।।जा.पा.।।